॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ४४

तेषां समुपविष्टानां सर्वेषां दीनचेतसाम् ।
उवाच वाक्यं काकुत्स्थो मुखेन परिशुष्यता ॥ १॥

सर्वे शृणुत भद्रं वो मा कुरुध्वं मनोऽन्यथा ।
पौराणां मम सीतायां यादृशी वर्तते कथा ॥ २॥

पौरापवादः सुमहांस्तथा जनपदस्य च ।
वर्तते मयि बीभत्सः स मे मर्माणि कृन्तति ॥ ३॥

अहं किल कुले जत इक्ष्वाकूणां महात्मनाम् ।
सीतां पापसमाचारामानयेयं कथं पुरे ॥ ४॥

जानासि हि यथा सौम्य दण्डके विजने वने ।
रावणेन हृता सीता स च विध्वंसितो मया ॥ ५॥

प्रत्यक्षं तव सौमित्रे देवनां हव्यवाहनः ।
अपापां मैथिलीमाह वायुश्चाकाशगोचरः ॥ ६॥

चन्द्रादित्यौ च शंसेते सुराणां संनिधौ पुरा ।
ऋषीणां चैव सर्वेषामपापां जनकात्मजाम् ॥ ७॥

एवं शुद्ध समाचारा देवगन्धर्वसंनिधौ ।
लङ्काद्वीपे महेन्द्रेण मम हस्ते निवेशिता ॥ ८॥

अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम् ।
ततो गृहीत्वा वैदेहीमयोध्यामहमागतः ॥ ९॥

अयं तु मे महान्वादः शोकश्च हृदि वर्तते ।
पौरापवादः सुमहांस्तथा जनपदस्य च ॥ १०॥

अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्य चित् ।
पतत्येवाधमाँल्लोकान्यावच्छब्दः स कीर्त्यते ॥ ११॥

अकीर्तिर्निन्द्यते दैवैः कीर्तिर्देवेषु पूज्यते ।
कीर्त्यर्थं च समारम्भः सर्व एव महात्मनाम् ॥ १२॥

अप्यहं जीवितं जह्यां युष्मान्वा पुरुषर्षभाः ।
अपवादभयाद्भीताः किं पुनर्जनकात्मजाम् ॥ १३॥

तस्माद्भवन्तः पश्यन्तु पतितं शोकसागरे ।
न हि पश्याम्यहं भूयः किं चिद्दुःखमतोऽधिकम् ॥ १४॥

श्वस्त्वं प्रभाते सौमित्रे सुमन्त्राधिष्ठितं रथम् ।
आरुह्य सीतामारोप्य विषयान्ते समुत्सृज ॥ १५॥

गङ्गायास्तु परे पारे वाल्मीकेः सुमहात्मनः ।
आश्रमो दिव्यसङ्काशस्तमसातीरमाश्रितः ॥ १६॥

तत्रैनां विजने कक्षे विसृज्य रघुनन्दन ।
शीघ्रमागच्छ सौमित्रे कुरुष्व वचनं मम ॥ १७॥

न चास्मि प्रतिवक्तव्यः सीतां प्रति कथं चन ।
अप्रीतिः परमा मह्यं भवेत्तु प्रतिवारिते ॥ १८॥

शापिताश्च मया यूयं भुजाभ्यां जीवितेन च ।
ये मां वाक्यान्तरे ब्रूयुरनुनेतुं कथं चन ॥ १९॥

मानयन्तु भवन्तो मां यदि मच्छासने स्थिताः ।
इतोऽद्य नीयतां सीता कुरुष्व वचनं मम ॥ २०॥

पूर्वमुक्तोऽहमनया गङ्गातीरे महाश्रमान् ।
पश्येयमिति तस्याश्च कामः संवर्त्यताम् अयम् ॥ २१॥

एवमुक्त्वा तु काकुत्स्थो बाष्पेण पिहितेक्षणः ।
प्रविवेश स धर्मात्मा भ्रातृभिः परिवारितः ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com